मार्कण्डेयपुराणम्/अध्यायः ७१-८०



Exported from Wikisource on २३ जनवरीमासः २०२४

एकसप्ततितमोऽध्यायः- ७१

मार्कण्डेय उवाच

तां प्रेषयित्वा राजापि स्वभर्तृगृहमङ्गनाम् ।
चिन्तयामास निः श्वस्य किमत्र सुकतं भवेत् ॥७१.१ ॥

अनर्घयोग्यता कष्टं स मामाह महामनाः ।
वैकल्यं विप्रमुद्दिश्य तथाहायं निशाचरः ॥७१.२ ॥

सोऽहं कथं करिष्यामि त्यक्ता पत्नी मया हि सा ।
अथवा ज्ञानदृष्टिं तं पृच्छामि मुनिसत्तमम् ॥७१.३ ॥

सञ्चिन्त्येत्थं स भूपालः समारुह्य च तं रथम् ।
ययौ यत्र स धर्मात्मा त्रिकालज्ञो महामिनिः ॥७१.४ ॥

अवरुह्य रथात् सोऽथ तं समेत्य प्रणम्य च ।
यथावृत्तं समाचख्यौ राक्षसेन समागमम् ॥७१.५ ॥

ब्राह्मण्या दर्शनञ्चैव दौः शील्यापगमं तथा ।
प्रेषणं भर्तृगेहे च कार्यमागमने च यत् ॥७१.६ ॥

ऋषिरुवाच

ज्ञातमेतन्मया पूर्वं यत् कृतन्ते नराधिप ।
कार्यमागमने चैव मत्समीपे तवाखिलम् ॥७१.७ ॥

पृच्छ मामिह किं कार्यं मयेत्युद्विग्नमानसः ।
त्वय्यागते महीपाल ! शृणु कार्यञ्च यत्त्वया ॥७१.८ ॥

पत्नी धर्मार्थकामानां कारणं प्रबलं नृणाम् ।
विशेषतश्च धर्मस्य सन्त्यक्तस्त्यजता हि ताम् ॥७१.९ ॥

अपत्नीको नरो भूप ! न योग्यो निजकर्मणाम् ।
ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रोऽपि वा नृप ॥७१.१० ॥

त्यजता भवता पत्नीं न शोभनमनुष्ठितम् ।
अत्याज्यो हि यथा भर्ता स्त्रीणां भर्या तथा नृणाम् ॥७१.११ ॥

राजोवाच

भगवन् ! किं करोम्येष विपाको मम कर्मणाम् ।
नानुकूलानुकूलस्य यस्मात्त्यक्ता ततो मया ॥७१.१२ ॥

यद्यत्करोति तत् क्षान्तं दह्यमानेन चेतसा ।
भगवंस्तद्वियोगार्तिबिभीतेनान्तरात्मना ॥७१.१३ ॥

साम्प्रतं तु वने त्यक्ता न वेद्मि क्व नु सा गता ।

भक्षिता वापि विपिने सिंह्व्याघ्रनिशाचरैः ॥७१.१४ ॥

ऋषीरुवाच

न भक्षिता सा भूपाल ! सिह्व्याघ्रनिशाचरैः ।
सा त्वविप्लुतचारित्रा साम्प्रतन्तु रसातले ॥७१.१५ ॥

राजोवाच

सा नीता केन पातालमास्ते सादूषिता कथम् ।
अत्यद्भुतमिदं ब्रह्मन् ! यथावद्वक्तुमर्हसि ॥७१.१६ ॥

ऋषिरुवाच

पाताले नागराजोऽस्ति प्रख्यातश्च कपोतकः ।

तेन दृष्टा त्वया त्यक्ता भ्रममाणा महावने ॥७१.१७ ॥

सा रूपशालिनी तेन सानुरागेण पार्थिव ।
वेदितार्थेन पातालं नीता सा युवती तदा ॥७१.१८ ॥

ततस्तस्य सुता सुभ्रूर्नन्दा नाम महीपते ।
भार्या मनोरमा चास्य नागराजस्य धीमतः ॥७१.१९ ॥

तया मातुः सपत्नीयं सा भवित्रीति शोभना ।
दृष्टा स्वगेहं सा नीता गुप्ता चान्तः पुरे शुभा ॥७१.२० ॥

यदा तु याचिता नन्दा न ददाति नृपोत्तरम् ।
मूका भविष्यसीत्याह तदा तां तनयां पिता ॥७१.२१ ॥

एवं शप्ता सुता तेन सा चास्ते तत्र भूपते ।
नीता तेनोरगेन्द्रेण धृता तत्सुतया सती ॥७१.२२ ॥

मार्कण्डेय उवाच

ततो राजा परं हर्षमवाप्य तमपृच्छत ।
द्विजवर्यं स्वदौर्भाग्यकारणं दयितां प्रति ॥७१.२३ ॥

राजोवाच

भगवन् ! सर्वलोकस्य मयि प्रीतिरनुत्तमा ।
किन्नु तत्कारणं येन स्वपत्नी नातिवत्सला ॥७१.२४ ॥

मम चासावतीवेष्टा प्राणेभ्योऽपि महामुने ।
सा च मां प्रति दुःशीला ब्रूहि यत्कारणं द्विज ॥७१.२५ ॥

ऋषीरुवाच

पाणिग्रहणकाले त्वं सूर्यभौमशनैश्चरैः ।
शुक्रवाचस्पतिभ्याञ्च तव भार्यावलोकिता ॥७१.२६ ॥

तन्मुहूर्तेऽभवच्चन्द्रस्तस्याः सोमसुतस्तथा ।
परस्परविपक्षौ तौ ततः पार्थिव ! ते भृशम् ॥७१.२७ ॥

तद्गच्छ त्वं स्वधर्मेण परिपालय मेदिनीम् ।
पत्नीसहायः सर्वाश्च कुरु धर्मवतीः क्रियाः ॥७१.२८ ॥

मार्कण्डेय उवाच

इत्युक्ते प्रणिपत्यैनमारुह्य स्यन्दनं ततः ।
उत्तमः पृथिवीपाल आजगाम निजं पुरम् ॥७१.२९ ॥

इति श्रीमार्कण्डेयपुराणे औत्तममन्वन्तरे एकसप्ततितमोऽध्यायः

द्विसप्ततितमोऽध्यायः- ७२

मार्कण्डेय उवाच

ततः स्वनगरं प्राप्य तं ददर्श द्विजं नृपः ।
समेतं भार्यया चैव शीलवत्या मुदान्वितम् ॥७२.१ ॥

ब्राह्मण उवाच

राजवर्य ! कृतार्थोऽस्मि यतो धर्मो हि रक्षितः ।
धर्मज्ञनेह भवता भार्यामानयता मम ॥७२.२ ॥

राजोवाच

कृतार्थस्त्वं द्विजश्रेष्ठ ! निजधर्मानुपालनात् ।

वयं सङ्कटिनो विप्र ! येषां पत्नी न वेश्मनि ॥७२.३ ॥

ब्राह्मण उवाच

नरेन्द्र ! सा हि विपिने भक्षिता श्वनापदैर्यदि ।

अलन्तया किमन्यस्या न पाणिर्गृह्यते त्वया ।

क्रोधस्य वशमागम्य धर्मो न रक्षितस्त्वया ॥७२.४ ॥

राजोवाच

न भक्षिता मे दयिता श्वापदैः सा हि जीवति ।

अविदूषितचारित्रा कथमेतत्करोम्यहम् ॥७२.५ ॥

ब्राह्मण उवाच

यदि जीवति ते भार्या न चैव व्यभिचारिणी ।
तदपत्नीकताजन्म किं पापं क्रियते त्वया ॥७२.६ ॥

राजोवाच

आनीतापि हि सा विप्र ! प्रतिकूला सदैव मे ।
दुः खाय न सुखायालं तस्या मैत्री न वै मयि ।
तथा त्वं कुरु यत्नं मे यथा सा वशगामिनी ॥७२.७ ॥

ब्राह्मण उवाच

तव संप्रीतये तस्या वरेष्टिरुपकारिणी ।
क्रियते मित्रकामैर्या मित्रविन्दां करोमि ताम् ॥७२.८ ॥

अप्रीतयोः प्रीतिकरो सा हि संजननी परम् ।
भार्यापत्योर्मनुष्येन्द्र ! तान्तवेष्टिं करोम्यहम् ॥७२.९ ॥

यत्र तिष्ठति सा सुभ्रूस्तव भार्या महीपते ।
तस्मादानोयतां सा ते परां प्रीतिमुपैष्यति ॥७२.१० ॥

मार्कण्डेय उवाच

इत्युक्तः स तु सम्भारानशेषानवनीपतिः ।
आनिनाय चकारेष्टिं स च तां द्विजसत्तमः ॥७२.११ ॥

सप्तकृत्वः स तु तदा चकारेष्टिं पुनः पुनः ।
तस्य राज्ञो द्विजश्रेष्ठो भार्यासम्पादनाय वै ॥७२.१२ ॥

यदारोपितमैत्रीन्ताममन्यत महामुनिः ।
स्वभर्तरि तदा विप्रस्तमुवाच नराधिपम् ॥७२.१३ ॥

आनीयतां नरश्रेष्ठ ! या तवेष्टात्मनोऽन्तिकम् ।
भुङ्क्ष्व भोगांस्तया सार्धं यज यज्ञांस्तथादृतः ॥७२.१४ ॥

मार्कण्डेय उवाच

इत्युक्तस्तेन विप्रेण भूपालो विस्मितस्तदा ।
सस्मार तं महावीर्यं सत्यसन्धं निशाचरम् ॥७२.१५ ॥

स्मृतस्तेन तदा सद्यः समुपेत्य नराधिपम् ।
किं करोमीति सोऽप्याह प्रणिपत्य महामुने ॥७२.१६ ॥

ततस्तेन नरेन्द्रेण विस्तरेण निवेदिते ।

गत्वा पातालमादाय राजपत्नीमुपाययौ ॥७२.१७ ॥

आनीता चातिहार्देन सा ददर्श तदा पतिम् ।
उवाच च प्रसीदेति भूयोभूयो मुदान्विता ॥७२.१८ ॥

ततः स राजा रभसा परिष्वज्याह मानिनीम् ।
प्रिये ! प्रसन्न एवाहं भूयोऽप्येवं ब्रवीषि किम् ॥७२.१९ ॥

पत्न्युवाच

यदि प्रसादप्रवणं नरेन्द्र ! मयि ते मनः ।
तदेतदभियाचे त्वां तत् कुरुष्व ममार्हणम् ॥७२.२० ॥

राजोवाच

निः शङ्कं ब्रूहि मत्तो यद्भवात्या किञ्चिदीप्सितम् ।
तदलभ्यं न ते भीरु ! तवायत्तोऽस्मि नान्यथा ॥७२.२१ ॥

पत्न्युवाच

मदर्थं तेन नागेन सुता शप्ता सखी मम ।
मूका भविष्यसीत्याह सा च मूकत्वमागता ॥७२.२२ ॥

तस्याः प्रतिक्रियां प्रीत्या मम शक्नोति चेद्भवान् ।
वाग्विघातप्रशान्त्यर्थं ततः किं न कृतं मम ॥७२.२३ ॥

मार्कण्डेय उवाच

ततः स राजा तं विप्रमाहास्मिन् कीदृशी क्रिया ।
तन्मूकतापनोदाय स च तं प्राह पार्थिवम् ॥७२.२४ ॥

ब्राह्मण उवाच

भूप ! सारस्वतीमिष्टिं करोमि वचनात्तव ।
पत्नी तवेयमानृण्यं यातु तद्वाक्प्रवर्तनात् ॥७२.२५ ॥

मार्कण्डेय उवाच

इष्टिं सारस्वतीं चक्रे तदर्थं स द्विजोत्तमः ।
सारस्वतानि सूक्तानि जजाप च समाहितः ॥७२.२६ ॥

ततः प्रवृत्तवाक्यान्तां गर्गः प्राह रसातले ।
उपकारः सखीभर्त्रा कृतोऽयमतिदुष्करः ॥७२.२७ ॥

इत्थं ज्ञानं समासाद्य नन्दा शीघ्रगतिः पुरम् ।
ततो राज्ञीं परिष्वज्य स्वसखीमुरगात्मजा ॥७२.२८ ॥

तञ्च संस्तूय भूपालं कल्याणोक्त्या पुनः पुनः ।
उवाच मधुरं नागी कृतासनपरिग्रहा ॥७२.२९ ॥

उपकारः कृतो वीर ! भवता यो ममाधुना ।
तेनास्म्याकृष्टहृदया यद्ब्रवीमि शृणुष्व तत् ॥७२.३० ॥

तव पुत्रो महावीर्यो भविष्यति नराधिप ।
तस्माप्रतिहतं चक्रमस्यां भुवि भविष्यति ॥७२.३१ ॥

सर्वार्थशास्त्रतत्त्वज्ञो धर्मानुष्ठानतत्परः ।
मन्वन्तरेश्वरो धीमान् ! भविष्यति स वै मनुः ॥७२.३२ ॥

मार्कण्डेय उवाच

इति दत्वा वरं तस्मै नागराजसुता ततः ।

सखीं तां संपरिष्वज्य पातालमगमन्मुने ॥७२.३३ ॥

तत्र तस्य तया सार्धं रमतः पृथिवीपतेः ।
जगाम कालः सुमहान् प्रजाः पालयतस्तथा ॥७२.३४ ॥

ततः स तस्यान्तनयो जज्ञे राज्ञो महात्मनः ।
पौर्णमास्यां यथा कान्तश्चन्द्रः संपूर्णमण्डलः ॥७२.३५ ॥

तस्मिन् जाते मुदं प्रापुः प्रजाः सर्वा महात्मनि ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात च ॥७२.३६ ॥

तस्य दृष्ट्वा वपुः कान्तं भविष्यं शीलमेव च ।
औत्तमश्चेति मुनयो नाम चक्रुः समागताः ॥७२.३७ ॥

जातोऽयमुत्तमे वंशे तत्र काले तथोत्तमे ।
उत्तमावयवस्तेन औत्तमोऽयं भविष्यति ॥७२.३८ ॥

मार्कण्डेय उवाच

उत्तमस्य सुतः सोऽथ नाम्ना ख्यातस्तथौत्तमः ।
मनुरासीत्तत्प्रभावो भागुरे श्रूयतां मम ॥७२.३९ ॥

उत्तमाख्यानमखिलं जन्म चैवोत्तमस्य च ।
नित्यं शृणोति विद्वेषं स कदाचिन्न गच्छति ॥७२.४० ॥

इष्टैर्दारैस्तथा पुत्रैर्बन्धुभिर्वा कदाचन ।
वियोगो नास्य भविता शृण्वतः पठतोऽपि वा ॥७२.४१ ॥

तस्य मन्वन्तरं ब्रह्मन् ! वदतो मे निशामय ।
श्रूयतां तत्र यश्चेन्द्रो ये च देवास्तथर्षयः ॥७२.४२ ॥

इति श्रीमार्कण्डेयपुराणे औत्तममन्वन्तरे द्विसप्ततितमोऽध्यायः

त्रिसप्ततितमोऽध्यायः- ७३

मार्कण्डेय उवाच

मन्वन्तरे तृतीयेऽस्मिन् औत्तमस्य प्रजापतेः ।
देवानिन्द्रमृषीन् भूपान् निबोध गदतो मम ॥७३.१ ॥

स्वधामानस्तथा देवा यथानामानुकारिणः ।
सत्याख्यश्च द्वितीयोऽन्यस्त्रिदशानां तथा गणः ॥७३.२ ॥

तृतीये तु गणे देवाः शिवाख्या मुनिसत्तम ।
शिवाः स्वरूपतस्ते तु श्रुताः पापप्रणाशनाः ॥७३.३ ॥

प्रतर्दनाख्यश्च गणो देवानां मुनिसत्तम ।

चतुर्थस्तत्र कथित औत्तमस्यान्तरे मनोः ॥७३.४ ॥

वशवर्तिनः पञ्चमेऽपि देवास्तत्र गणे द्विज ।
यथाख्यातस्वरूपास्तु सर्व एव महामुने ॥७३.५ ॥

एते देवगणाः पञ्च स्मृता यज्ञभुजस्तथा ।
मन्वन्तरे मनुश्रेष्ठे सर्वे द्वादशका गणाः ॥७३.६ ॥

तेषामिन्द्रो महाभागस्त्रैलोक्ये स गुरुर्भवेत् ।
शतं क्रतूनामाहृत्य सुशान्तिर्नाम नामतः ॥७३.७ ॥

यस्योपसर्गनाशाय नामाक्षरविभूषिता ।
अद्यापि मानवैर्गाथा गीयते तु महीतले ॥७३.८ ॥

शुशान्तिर्देवराट् कान्तः शुशान्तिं स प्रयच्छति ।
सहितः शिवसत्याद्यैस्तथैव वशवर्तिभिः ॥७३.९ ॥

अजः परशुचिर्दिव्यो महाबलपराक्रमः ।
पुत्रस्तस्य मनोरासन् विख्यातास्त्रिदशोपमाः ॥७३.१० ॥

तत्सूतिसम्भवैर्भूमिः पालिताभून्नरेश्वरैः ।
यावन्मन्वन्तर तस्य मनोरुत्तमतेजसः ॥७३.११ ॥

चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः ।
कृतत्रेतादिसंज्ञानां यान्युक्तानि युगे मया ॥७३.१२ ॥

स्वतेजसा हि तपसो वरिष्ठस्य महात्मनः ।
तनयाश्चान्तरे तस्मिन् सप्त सप्तर्षयोऽभवन् ॥७३.१३ ॥

तृतीयमेतत्कथितं तव मन्वन्तरं मया ।
तामसस्य चतुर्थन्तु मनोरन्तरमुच्यते ॥७३.१४ ॥

वियोनिजन्मनो यस्य यशसा द्योतितं जगत् ।
जन्म तस्य मनोर्ब्रह्मन् ! श्रुयतां गदतो मम ॥७३.१५ ॥

अतीन्द्रियमशेषाणां मनूनाञ्चरितन्तथा ।
तथा जन्मापि विज्ञेयं प्रभावश्च महात्मनाम् ॥७३.१६ ॥

इति श्रीमार्कण्डेयपुराणे औत्तममन्वन्तरे त्रिसप्ततितमोऽध्यायः

चतुः सप्ततितमोऽध्यायः- ७४

मार्कण्डेय उवाच

राजाभूद् विख्यातः स्वराष्ट्रो नाम वीर्यवान् ।
अनेकयज्ञकृत् प्राज्ञः संग्रामेष्वपराजितः ॥७४.१ ॥

तस्यायुः सुमहत्प्रादात् मन्त्रिणाराधितो रविः ।

पत्नीनाञ्च शतन्तस्य धन्यानामभवद् द्विज ॥७४.२ ॥

तस्य दीर्घायुषः पत्न्यो नातिदीर्घायुषो मुने ।
कालेन जग्मुर्निधनं भृत्यमन्त्रिजनास्तथा ॥७४.३ ॥

स भार्याभिस्तथायुक्तो भृत्यैश्च सहजन्मभिः ।
उद्विग्नचेताः संप्राप वीर्यहानिमहर्निशम् ॥७४.४ ॥

तं वीर्यहीनं निभृतैर्भृत्यैस्त्यक्तं सुदुःखितम् ।
अनन्तरो विमर्दाख्यो राज्याच्च्यावितवांस्तदा ॥७४.५ ॥

राज्याच्च्युतः सोऽपि वनं गत्वा निर्विण्णमानसः ।
तपस्तेपे महाभागे वितस्तापुलिने स्थितः ॥७४.६ ॥

ग्रीष्मे पञ्चतमा भूत्वा वर्षास्वभ्रंकषाशिकः ।
जलशायी च शिशिरे निराहारो यतव्रतः ॥७४.७ ॥

ततस्तपस्यतस्तस्य प्रावृट्काले महाप्लवः ।
बभूवानुदिनं मेघैर्वर्षद्भिरनुसन्ततम् ॥७४.८ ॥

न दिग्विज्ञायते पूर्वा दक्षिणा वा न पश्चिमा ।
नोत्तरा तमसा सर्वमनुलिप्तमिवाभवत् ॥७४.९ ॥

ततोऽतिपूरेण नृपः स नद्याः प्रेरितस्तटम् ।
प्रार्थयन्नापि नावाप ह्रियमाणो महीपतिः ॥७४.१० ॥

अथ दूरे जलौघेन ह्रियमाणो महीपतिः ।
आससाद जले रौहीं स पुच्छे जगृहे च ताम् ॥७४.११ ॥

तेन प्लवेन स ययावूह्यमानो महीतले ।
इतश्चेतश्चान्धकारे आससाद तटन्ततः ॥७४.१२ ॥

विस्तारि पङ्कमत्यर्थं दुस्तरं स नृपस्तरन् ।
तथैव कृष्यमाणोऽन्यद्रम्यं वनमवाप सः ॥७४.१३ ॥

तत्रान्धकारे सा रौही चकर्ष वसुधाधिपम् ।
पुच्छे लग्नं महाभागं कृशं धमनिसन्ततौ ॥७४.१४ ॥

तस्याश्च स्पर्शसंभूतामवापमुदमुत्तमाम् ।
सोऽन्धकारे भ्रमन् भूयो मदनाकृष्टमानसः ॥७४.१५ ॥

विज्ञाय सानुरागं तं पृष्ठस्पर्शनतत्परम् ।
नरेन्द्रं तद्वनस्यान्तः सा मृगी तमुवाच ह ॥७४.१६ ॥

किं पृष्ठं वेपथुमता करेण स्पृशसे मम ।
अन्यथैवास्य कार्यस्य सञ्जाता नृपते गतिः ॥७४.१७ ॥

नास्थाने वो मनो यातं नागम्याहं तवेश्वर ।
किन्तु त्वत्सङ्गमे विघ्नमेष लोलः करोति मे ॥७४.१८ ॥

मार्कण्डेय उवाच

इति श्रुत्वा वचस्तस्या मृग्याश्च जगतीपतिः ।
जातकौतूहलो रौहीमिदं वचनमब्रवीत् ॥७४.१९ ॥

का त्वं ब्रूहि मृगी वाक्यं कथं मानुषवद्वदेत् ।
कश्चैव लोलो यो विघ्नं त्वत्सङ्गे कुरुते मम ॥७४.२० ॥

मृग्युवाच

अहन्ते दयिता भूप ! प्रागासमुत्पलावती ।
भार्या शताग्रमहिषी दुहिता दृढधन्वनः ॥७४.२१ ॥

राजोवाच

किन्तु यावत् कृतं कर्म येनेमां योनिमागता ।
पतिव्रता धर्मपरा सा चेत्थं कथमीदृशी ॥७४.२२ ॥

मृग्युवाच

अहं पितृगृहे बाला सखीभिः सहिता वनम् ।
रन्तुं गता ददर्शैकं मृगं मृग्या समागतम् ॥७४.२३ ॥

ततः समीपवर्तिन्या मया सा ताडिता मृगी ।
मया त्रस्ता गतान्यत्र क्रुद्धः प्राह ततो मृगः ॥७४.२४ ॥

मूढे किमेवं मत्तासि धिक्ते दौःशील्यमीदृशम् ।
आधानकालो येनायं त्वया मे विफलीकृतः ॥७४.२५ ॥

वाचं श्रुत्वा ततस्तस्य मानुषस्येव भाषतः ।
भीता तमब्रुवं कोऽसीत्येतां योनिमुपागतः ॥७४.२६ ॥

ततः स प्राह पुत्रोऽहमृषेर्निर्वृतिचक्षुषः ।
सुतपा नाम मृग्यान्तु साभिलाषो मृगोऽभवम् ॥७४.२७॥

इमाञ्चानुगतः प्रेम्णा वाञ्छितश्चानया वने ।
त्वया वियोजिता दुष्टे तस्माच्छापं ददामि ते ॥७४.२८॥

मया चोक्तं तवाज्ञानादपराधः कृतो मुने ।
प्रसादं कुरु शापं मे न भवान् दातुमर्हति ॥७४.२९॥

इत्युक्तः प्राह मां सोऽपि मुनिरित्थं महीपते ।
न प्रयच्छामि शापं ते यद्यात्मानं ददासि मे ॥७४.३०॥

मया चोक्तं मृगी नाहं मृगरूपधरा वने ।
लप्स्यसेऽन्यां मृगीन्तावन्मयि भावो निवर्त्यताम् ॥७४.३१॥

इत्युक्तः कोपरक्ताक्षः स प्राह स्फुरिताधरः ।

नाहं मृगी त्वयेत्युक्तं मृगी मूढे भविष्यसि ॥७४.३२ ॥

ततो भृशं प्रव्यथिता प्रणम्य मुनिमब्रुवम् ।
स्वरूपस्थमतिक्रुद्धं प्रसीदेति पुनः पुनः ॥७४.३३ ॥

बालानभिज्ञा वाक्यानां ततः प्रोक्तमिदं मया ।
पितर्यसति नारीभिर्व्रियते हि पतिः स्वयम् ॥७४.३४ ॥

सति ताते कथञ्चाहं वृणोमि मुनिसत्तम ।
सापराधाथवा पादौ प्रसीदेश नमाम्यहम् ॥७४.३५ ॥

प्रसीदेति प्रसीदेति प्रणताया महामते ।
इत्थं लालप्यमानायाः स प्राह मुनिपुङ्गवः ॥७४.३६ ॥

न भवत्यन्यथा प्रोक्तं मम वाक्यं कदाचन ।
मृगी भविष्यसि मृता वनेऽस्मिन्नेव जन्मनि ॥७४.३७ ॥

मृगत्वे च महाबाहुस्तव गर्भमुपैष्यति ।
लोलो नाम मुनेः पुत्रः सिद्धवीर्यस्य भामिनि ॥७४.३८ ॥

जातिस्मरा भवित्री त्वं तस्मिन् गर्भमुपागते ।
स्मृतिं प्राप्य तथा वाचं मानुषीमीरयिष्यसि ॥७४.३९ ॥

तस्मिन् जाते मृगीत्वात् त्वं विमुक्ता पतिनार्चिता ।
लोकानवाप्स्यसि प्राप्या ये न दुष्कृतकर्मभिः ॥७४.४० ॥

सोऽपि लोलो महावीर्यः पितृशत्रून् निपात्य वै ।
जित्वा वसुन्धरां कृत्स्त्रां भविष्यति ततो मनुः ॥७४.४१ ॥

एवं शापमहं लब्ध्वा मृता तिर्यक्त्वमागता ।
त्वत्संस्पर्शाच्च गर्भोऽसौ संभूतो जठरे मम ॥७४.४२ ॥

अतो ब्रवीमि नास्थाने तव यातं मनो मयि ।
न चाप्यगम्या गर्भस्थो लोलो विघ्नं करोत्यसौ ॥७४.४३ ॥

मार्कण्डेय उवाच

एवमुक्तस्ततः सोऽपि राजा प्राप्य परां मुदम् ।
पुत्रो ममारीञ्जित्वेति पृथिव्यां भविता मनुः ॥७४.४४ ॥

ततस्तं सुषुवे पुत्रं सा मृगी लक्षणान्वितम् ।
तस्मिन् जाते च भूतानि सर्वाणि प्रययुर्मुदम् ॥७४.४५ ॥

विशेषतश्च राजासौ पुत्रे जाते महाबले ।
सा विमुक्ता मृगी शापात् प्राप लोकाननुत्तमान् ॥७४.४६ ॥

ततस्तस्यर्षयः सर्वे समेत्य मुनिसत्तम ।
अवेक्षय भाविनीमृद्धिं नाम चक्रुर्महात्मनः ॥७४.४७ ॥

तामसीं भजमानायां योनिं मातर्यजायत ।

तमसा चावृते लोके तामसोऽयं भविष्यति ॥७४.४८ ॥

ततः स तामसस्तेन पित्रा संवर्धितो वने ।
जातबुद्धिरुवाचेदं पितरं मुनिसत्तम ॥७४.४९ ॥

कस्त्वं तात कथं वाहं पुत्रो माता च का मम ।
किमर्थमागतश्च त्वमेतत् सत्यं ब्रवीहि मे ॥७४.५० ॥

मार्कण्डेय उवाच

ततः पिता यथावृत्तं स्वराज्यच्यावनादिकम् ।
तस्याचष्टे महाबहुः पुत्रस्य जगतीपतिः ॥७४.५१ ॥

श्रुत्वा तत् सकलं सोऽपि समाराध्य च भास्करम् ।
अवाप दिव्यान्यस्त्राणि ससंहाराण्यशेषतः ॥७४.५२ ॥

कृतास्त्रस्तानरीन् जित्वा पितुरानीय चान्तिकम् ।
अनुज्ञातान् मुनोचाथ तेन स्वं धर्ममास्थितः ॥७४.५३ ॥

पितापि तस्य स्वान् लोकांस्तपोयज्ञसमार्जितान् ।
विसृष्टदेहः संप्राप्तो दृष्ट्वा पुत्रमुखं सुखम् ॥७४.५४ ॥

जित्वा समस्तां पृथिवीं तामसाख्यः स पार्थिवः ।
तामसाख्यो मनुरभूत्तस्य मन्वन्तरं शृणु ॥७४.५५ ॥

ये देवा यत्पतिर्यश्च देवेन्द्रो ये तथर्षयः ।
ये पुत्राश्च मनोस्तस्य पृथिवीपरिपालकाः ॥७४.५६ ॥

सत्यास्तथान्ये सुधियः सुरूपा हरयस्तथा ।
एते देवगणास्तत्र सप्तविंशतिका मुने ॥७४.५७ ॥

महाबलो महावीर्यः शतयज्ञोपलक्षितः ।
शिखिरिन्द्रस्तथा तेषां देवानामभवद्विभुः ॥७४.५८ ॥

ज्योतिर्धर्मा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा ।
पीवरश्च तथा ब्रह्मन् ! सप्त सप्तर्षयोऽभवन् ॥७४.५९ ॥

नरः क्षान्तिः शान्तदान्तजानुजङ्घादयस्तथा ।
पुत्रास्तु तामसस्यासन् राजानः सुमहाबलाः ॥७४.६० ॥

इत्येतत्तामसं विप्र मन्वन्तरमुदाहृतम् ।
यः पठेत् शृणुयाद्वापि तमसा सन बाध्यते ॥७४.६१ ॥

इति श्रीमार्कण्डेयपुराणेठतामसमन्वन्तरेऽ चतुः
सप्ततितमोऽध्यायः.

पञ्चसप्ततितमोऽध्यायः- ७५

मार्कण्डेय उवाच

पञ्चमोऽपि मनुर्ब्रह्मन् रैवतो नाम विश्रुतः ।
तस्योत्पत्तिं विस्तरशः शृणुष्व कथयामि ते ॥७५.१ ॥

ऋषिरासीन्महाभाग ऋतवागिति विश्रुतः ।
तस्यापुत्रस्य पुत्रोऽभूद्रेवत्यन्ते महात्मनः ॥७५.२ ॥

स तस्य विधिवच्चक्रे जातकर्मादिकाः क्रियाः ।
तथोपनयनादींश्च स चाशीलोऽभवन्मुने ॥७५.३ ॥

यतः प्रभृति जातोऽसौ ततः प्रभृति सोऽप्यृषिः ।
दीर्घरोगपरामर्शमवाप मुनिपुङ्गवः ॥७५.४ ॥

माता तस्य परामार्तिं कुष्ठरोगादिपीडिता ।
जगाम स पिता चास्य चिन्तयामास दुःखितः ॥७५.५ ॥

किमेतदिति सोऽप्यस्य पुत्रोऽप्यत्यन्तदुर्मतिः ।
जग्राह भार्यामन्यस्य मुनिपुत्रस्य संमुखीम् ॥७५.६॥

ततो विषण्णमनसा ऋतवागिदमुक्तवान् ।
अपुत्रता मनुष्याणां श्रेयसे न कुपुत्रता ॥७५.७॥

कुपुत्रो हृदयायासं सर्वदा कुरुते पितुः ।
मातुश्च स्वर्गसंस्थांश्च स्वपितॄन् पातयत्यधः ॥७५.८॥

सुहृदां नोपकाराय पितॄणाञ्च न तृप्तये ।
पित्रोर्दुःखाय धिग् जन्म तस्य दुष्कृतकर्मणः ॥७५.९॥

धन्यास्ते तनया येषां सर्वलोकाभिसंमताः ।
परोपकारिणः शान्ताः साधुकर्मण्यनुव्रताः ॥७५.१०॥

अनिर्वृतं तथा मन्दं परलोकपराङ्मुखम् ।

नरकाय न सद्गत्यै कुपुत्रालम्बि जन्मनः ॥७५.११॥

करोति सुहृदां दैन्यमहितानां तथा मुदम् ।
अकाले च जरां पित्रोः कुपुत्रः कुरुते ध्रुवम् ॥७५.१२॥

मार्कण्डेय उवाच

एवं सोऽत्यन्तदुष्टस्य पुत्रस्य चरितैर्मुनिः ।
दह्यमानमनोवृत्तिर्वृत्तं गर्गमपृच्छत ॥७५.१३॥

ऋतवागुवाच

सुव्रतेन पुरा वेदा गृहीता विधिवन्मया ।
समप्य वेदान् विधिवत् कृतो दारपरिग्रहः ॥७५.१४॥

सदारेण क्रियाः कार्याः श्रौताः स्मार्ता वषट्क्रियाः ।
न मे न्यूनाः कृताः काश्चिद्यावदद्य महामुने ॥७५.१५ ॥

गर्भाधानविधानेन न काममनुरुध्यता ।
पुत्रार्थं जनितश्चायं पुन्नाम्नो बिभ्यता मुने ॥७५.१६ ॥

सोऽयं किमात्मदोषेण मम दोषण वा मुने ।
अस्मद्दुःखवहो जातो दौःशील्याद् बन्धुशोकदः ॥७५.१७ ॥

रेवत्यन्ते मुनिश्रेष्ठ ! जातोऽयं तनयस्तव ।
तेन दुःखाय ते दुष्टे काले यस्मादजायत ॥७५.१८ ॥

न तेऽपचारो नैवास्य मातुर्नायं कुलस्य ते ।
तस्य दौःशील्यहेतुस्तु रेवत्यन्तमुपागतम् ॥७५.१९ ॥

ऋतवागुवाच

यस्मान्ममैकपुत्रस्य रेवत्यन्तसमुद्भवम् ।
दौः शील्यमेतत् सा तस्मात् पततामाशु रेवती ॥७५.२०॥

मार्कण्डेय उवाच

तेनैवं व्याहृते शापे रेवत्यृक्षं पपात ह ।
पश्यतः सर्वलोकस्य विस्मयाविष्टचेतसः ॥७५.२१॥

रेवत्यृक्षञ्च पतितं कुमुदाद्रौ समन्ततः ।
भावयामास सहसा वनकन्दरनिर्झरम् ॥७५.२२॥

कुमुदाद्रिश्च तत्पातात् ख्यातो रैवतकोऽभवत् ।
अतीव रम्यः सर्वस्यां पृथिव्यां पृथिवीधरः ॥७५.२३॥

तस्यर्क्षस्य तु या कान्तिर्जाता पङ्कजिनी सरः ।
ततो जज्ञे तदा कन्या रूपेणातीव शोभना ॥७५.२४॥

रेवतीकान्तिसम्भूतां तां दृष्ट्वा प्रमुचो मुनिः ।
तस्या नाम चकारेत्थं रेवती नाम भागुरे ॥७५.२५ ॥

पोषयामास चैवैतां स्वाश्रमाभ्यासस्मभवाम् ।
प्रमुचः स महाभागस्तस्मिन्नेव महाचले ॥७५.२६ ॥

तान्तु यौवनिनीं दृष्ट्वा कान्यकां रूपशालिनीम् ।
स मुनिश्चिन्तमामास कोऽस्या भर्ता भवेदिति ॥७५.२७ ॥

एवं चिन्तयतस्तस्य ययौ कालो महान् मुने ।
न चाससाद सदृशं वरं तस्या महामुनिः ॥७५.२८ ॥

ततस्तस्या वरं प्रष्टुमग्निं स प्रमुचो मुनिः ।
विवेश वह्निशालां वै प्रष्टारं प्राह हव्यभुक् ॥७५.२९ ॥

महाबलो महावीर्यः प्रियवाग् धर्मवत्सलः ।

दुर्गमो नाम भविता भर्ता ह्यस्य महीपतिः ॥७५.३०॥

मार्कण्डेय उवाच

अनन्तरञ्च मृगयाप्रसङ्गेनागतो मुने ।
तस्याश्रमपदं धीमान् दुर्गमः स नराधिपः ॥७५.३१॥

प्रियव्रतान्वयभवो महाबलपराक्रमः ।
पुत्रो विक्रमशीलस्य कालिन्दीजठरोद्भवः ॥७५.३२॥

स प्रविश्याश्रमपदं तां तन्वीं जगतीपतिः ।
अपश्यमानस्तमृषिं प्रियेत्यामन्त्र्य पृष्टवान् ॥७५.३३॥

राजोवाच

क्व गतो भगवानस्मादाश्रमान्मुनिपुङ्गवः ।

तं प्रणेतुमिहेच्छामि तत् त्वं प्रब्रूहि शोभने ॥७५.३४ ॥

मार्कण्डेय उवाच

अग्निसालां गतो विप्रस्तच्छ्रुत्वा तस्य भाषितम् ।

प्रियेत्यामन्त्रणञ्चैव निश्चक्राम त्वरान्वितः ॥७५.३५ ॥

स ददर्श महात्मानं राजानं दुर्गमं मुनिः ।

नरेन्द्रचिह्नसहितं प्रश्रयावनतं पुरः ॥७५.३६ ॥

तस्मिन् दृष्टे ततः शिष्यमुवाच स तु गौतमम् ।

गौतमानीयतां शीघ्रमर्घोऽस्य जगतीपतेः ॥७५.३७ ॥

एकस्तावदयं भूपश्चिरकालादुपागतः.

जामाता च विशेषेण योग्योऽर्घस्य मतो मम ॥७५.३८ ॥

मार्कण्डेय उवाच

ततः स चिन्तयामास राजा जामातृकारणम् ।
विवेद च न तन्मौनी जगृहेऽघञ्च तं नृपः ॥७५.३९॥

तमासनगतं विप्रो गृहीतार्घं महामुनिः ।
स्वागतं प्राह राजेन्द्रमपि ते कुशलं गृहे ॥७५.४०॥

कोषे बलेऽथ मित्रेषु भृत्यामात्ये नरेश्वर ।
तथात्मनि महाबाहो यत्र सर्वं प्रतिष्ठितम् ॥७५.४१॥

पत्नी च ते कुशलिनी यत एवानुतिष्ठति ।
पृच्छाम्यस्यास्ततो नाहं कुशलिन्योऽपरास्तव ॥७५.४२॥

राजोवाच

त्वत्प्रसादादकुशलं न क्कचिन्मम सुव्रत ।
जातकौतूहलश्चास्मि मम भार्यात्र का मुने ॥७५.४३ ॥

ऋषिरुवाच

रेवती सुमहाभागा त्रैलोक्यस्यापि सुन्दरी ।
तव भर्या वरारोहा तां त्वं राजन्न वेत्सि किम् ॥७५.४४ ॥

राजोवाच

सुभद्रां शान्ततनयां कावेरीतनयां विभो ।
सुराष्ट्रजां सुजाताञ्च कदम्बाञ्च वरूथजाम् ॥७५.४५ ॥

विपाठां नन्दिनीञ्चैव वेद्मि भार्यां गृहे द्विज ।

तिष्ठन्ति मे न भगवन् रेवतीं वेद्मि कान्वियम् ॥७५.४६ ॥

ऋषिरुवाच

प्रियेति साम्प्रतं येयं त्वयोक्ता वरवर्णिनी ।

किं विस्मृतन्ते भूपाल ! श्लाघ्येयं गृहिणी तव ॥७५.४७ ॥

राजोवाच

सत्यमुक्तं मया किन्तु भावो दुष्टो न मे मुने ।

नात्र कोपं भवान् कर्तुमर्हत्यस्मासु याचितः ॥७५.४८ ॥

ऋषिरुवाच

तत्त्वं ब्रवीषि भूपाल ! न भावस्तव दूषितः ।

व्याजहार भवानेतद्वह्निना नृप चोदितः ॥७५.४९ ॥

मया पृष्टो हुतवहः कोऽस्या भर्तेति पार्थिव ।
भविता तेन चाप्युक्तो भवानेवाद्य वै वरः ॥७५.५० ॥

तद्गृह्यतां मया दत्ता तुभ्यं कन्या नराधिप ।
प्रियेत्यामन्त्रिता चेयं विचारं कुरुषे कथम् ॥७५.५१ ॥

मार्कण्डेय उवाच

ततोऽसावभवन्मौनी तेनोक्तः पृथिवीपतिः ।
ऋषिस्तथोद्यतः कर्तुं तस्या वैवाहिकं विधिम् ॥७५.५२ ॥

तमुद्यतं सा पितरं विवाहाय महामुने ।
उवाच कन्या यत्किञ्चित् प्रश्रयावनतानना ॥७५.५३ ॥

यदि मे प्रीतिमांस्तात प्रसादं कर्तुमर्हसि ।
रेवत्यृक्षे विवाहं मे तत्करोतु प्रसादितः ॥७५.५४॥

ऋषिरुवाच

रेवत्यृक्षं न वै भद्रे चन्द्रयोगि व्यवस्थितम् ।
अन्यानि सन्ति ऋक्षाणि सुभ्रु वैवाहिकानि ते ॥७५.५५॥

कन्योवाच

तात तेन विना कालो विफलः प्रतिभाति मे ।
विवाहो विफले काले मद्विधायाः कथं भवेत् ॥७५.५६॥

ऋषिरुवाच

ऋतवागिति विख्यातस्तपस्वी रेवतीं प्रति ।
चकार कोपं क्रुद्धेन तेनर्क्षं विनिपातितम् ॥७५.५७॥

मया चास्मै प्रतिज्ञाता भर्येति मदिरेक्षणा ।
न चेच्छसि विवाहं त्वं सङ्कटं नः समागतम् ॥७५.५८॥

कन्योवाच

ऋतवाक् स मुनिस्तात किमेवं तप्तवांस्तपः ।
न त्वया मम तातेन ब्रह्मबन्धोः सुतास्मि किम् ॥७५.५९॥

ऋषिरुवाच

ब्रह्मबन्धोः सुता न त्वं बाले नैव तपस्विनः ।

सुता त्वं मम यो देवान् कर्तुमन्यान् समुत्सहे ॥७५.६० ॥

कन्योवाच

तपस्वी यदि मे तातस्तत्किमृक्षमिदं दिवि ।
समारोप्य विवाहो मे तदृक्षे क्रियते न तु ॥७५.६१ ॥

ऋषिरुवाच

एवं भवतु भद्रन्ते भद्रे प्रीतिमती भव ।
आरोपयामीन्दुमार्गे रेवत्यृक्षं कृते तव ॥७५.६२ ॥

मार्कण्डेय उवाच

ततस्तपः प्रभावेण रेवत्यृक्षं महामुनिः ।
यथापूर्वन्तथा चक्रे सोमयोगि द्विजोत्तम ॥७५.६३ ॥

विवाहञ्चैव दुहितुर्विधिवद् मन्त्रयोगिनम् ।
निष्पाद्य प्रीतिमान् भूयो जामातारमथाब्रवीत् ॥७५.६४ ॥

औद्वाहिकन्ते भूपाल कथ्यतां किं ददाम्यहम् ।
दुर्लभ्यमपि दास्यामि ममाप्रतिहतन्तपः ॥७५.६५ ॥

राजोवाच

मनोः स्वयम्भुवस्याहमुत्पन्नः सन्ततौ मुने ।
मन्वन्तराधिपं पुत्रं त्वत्प्रसादाद् वृणोम्यहम् ॥७५.६६ ॥

ऋषिरुवाच

भविष्यत्येष ते कामो मनुस्त्वत्तनयो महीम् ।
सकलां भोक्षयते भूप धर्मविच्च भविष्यति ॥७५.६७ ॥

मार्कण्डेय उवाच

तामादाय ततो भूपः स्वमेव नगरं ययौ ।
तस्मादजायत सुतो रेवत्या रैवतो मनुः ॥७५.६८ ॥

समेतः सकलैर्धर्मैर्मानवैरपराजितः ।
विज्ञाताखिलशास्त्रार्थो वेदविद्यार्थशास्त्रवित् ॥७५.६९ ॥

तस्य मन्वन्तरे देवान् मुनिदेवेन्द्रपार्थिवान् ।
कथ्यमानान् मया ब्रह्मन् निबोध सुसमाहितः ॥७५.७० ॥

सुमेधसस्तत्र देवास्तथा भूपतयो द्विज ।
वैकुण्ठश्चामिताभश्च चतुर्दश चतुर्दश ॥७५.७१ ॥

तेषां देवगणानान्तु चतुर्णामपि चेश्वरः ।
नाम्ना विभुरभूदिन्द्रः शतयज्ञोपलक्षकः ॥७५.७२॥

हिरण्यलोमा वेदश्रीरूर्ध्वबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥७५.७३॥

वसिष्ठश्च महाभागो वेदवेदान्तपारगः ।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः ॥७५.७४॥

बलबन्धुर्महावीर्यः सुयष्टव्यस्तथापरः ।
सत्यकाद्यास्तथैवासन् रैवतस्य मनोः सुताः ॥७५.७५॥

रैवतान्तास्तु मनवः कथिता ये मया तव ।
स्वायम्भुवाश्रया ह्येते स्वारोचिषमृते मनुम् ॥७५.७६॥

(य एषां शृणुयान्नित्यं पठेदाख्यानमुत्तमम् ।

विमुक्तः सर्वपापेभ्यो लोकं प्राप्नोत्यभीप्सितम् ॥७५.७७ ॥

इति श्रीमार्कण्डेयपुराणे रैवतमन्वन्तरे पञ्चसप्ततितमोऽध्यायः

षट्सप्ततितमोऽध्यायः- ७६

मार्कण्डेय उवाच

इत्येतत् कथितं तुभ्यं पञ्च मन्वन्तरं तव ।

चाक्षुषस्य मनोः षष्ठं श्रूयतामिदमन्तरम् ॥७६.१ ॥

अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।

चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज ॥७६.२ ॥

जातं माता निजोत्सङ्गे स्थितमुल्लाप्य तं पुनः ।
परिष्वजति हार्देन पुनरुल्लापयत्यथ ॥७६.३ ॥

जातिस्मरः स जातो वै मातुरुत्सङ्गमास्थितः ।
जहास तं तदा माता संक्रुद्धा वाक्यमब्रवीत् ॥७६.४ ॥

भीतास्मि किमिदं वत्स ! हासो यद्वदने तव ।
अकालबोधः सञ्जातः कच्चित् पश्यसि शोभनम् ॥७६.५ ॥

पुत्र उवाच

मामत्तुमिच्छति पुरो मार्जारी किम न पश्यसि ।
अन्तर्धानगता चेयं द्वितीया जातहारिणी ॥७६.६ ॥

पुत्रप्रीत्या च भवती सहार्दा मामवेक्षती ।
उल्लाप्योल्लाप्य बहुशः परिष्वजति मां यतः ॥७६.७ ॥

उद्भूतपुलका स्नेहसम्भवास्त्राविलेक्षणा ।

ततो ममागतो हासः शृणु चाप्यत्र कारणम् ॥७६.८ ॥

स्वार्थे प्रसक्ता मार्जारी प्रसक्तं मामवेक्षते ।

तथान्तर्धानगा चैव द्वितीया जातहारिणी ॥७६.९ ॥

स्वार्थाय स्निग्धहृदया यथैवैते ममोपरि ।

प्रवृत्ते स्वार्थमास्थाय तथैव प्रतिभासि मे ॥७६.१० ॥

किन्तु मदुपभोगाय मार्जारी जातहारिणी ।

त्वन्तु क्रमेणोपभोग्यं मत्तः फलमभीप्ससि ॥७६.११ ॥

न मां जानासि कोऽप्येष न चैवापकृतं मया ।

सङ्गतं नातिकालीनं पञ्चसप्तदिनात्मकम् ॥७६.१२ ॥

तथापि स्त्रिह्यसे सास्त्रा परिष्वजसि चाप्यति ।

तातेति वत्स ! भद्रेति निर्व्यलीकं ब्रवीषि माम् ॥७६.१३ ॥

मातोवाच

न त्वाहमुपकारार्थं वत्स ! प्रीत्या परिष्वजे ।

न चेदेतद्भवत्प्रीत्यै परित्यक्तास्म्यहं त्वया ॥७६.१४ ॥

स्वार्थो मया परित्यक्तो यस्त्वत्तो मे भविष्यति ।

इत्युक्त्वा सा तमुत्सृज्य निष्क्रान्ता सूतिकागृहात् ॥७६.१५ ॥

जडाङ्गबाह्यकरणं शुद्धान्तः करणात्मकम् ।

जहार तं परित्यक्तं सा तदा जातहारिणी ॥७६.१६ ॥

सा हृत्वा तं तदा बालं विक्रान्तस्य महीभृतः ।

प्रसूतपत्नीशयने न्यस्य तस्याददे सुतम् ॥७६.१७ ॥

तमप्यन्यगृहे नीत्वा गृहीत्वा तस्य चात्मजम् ।

तृतीयं भक्षयामास सा क्रमाज्जातहारिणी ॥७६.१८ ॥

हृत्वा हृत्वा तृतीयन्तु भक्षयत्यतिनिर्घृणा ।
करोत्यनुदिनं सा नु परिवर्तन्तथान्ययोः ॥७६.१९ ॥

विक्रान्तोऽपि ततस्तस्य सुतस्यैव महीपतिः ।
कारयामास संस्कारान् राजन्यस्य भवन्ति ये ॥७६.२० ॥

आनन्देति च नामास्य पिता चक्रे विधानतः ।
मुदा परमया युक्तो विक्रान्तः स नराधिपः ॥७६.२१ ॥

कृतोपनयनं तन्तु गुरुराह कुमारकम् ।
जनन्याः प्रागुपस्थानं क्रियताञ्चाभिवादनम् ॥७६.२२ ॥

स गुरोस्तद्वचः श्रुत्वा विहस्यैवमथाब्रवीत् ।
वन्द्या मे कतमा माता जननी पालनी नु किम् ॥७६.२३ ॥

गुरुरुवाच

न त्वियं ते महाभाग ! जनयित्री रुथात्मजा ।
विक्रान्तस्याग्रमहिषी हैमिनी नाम नामतः ॥७६.२४ ॥

आनन्द उवाच

इयं जनित्री चैत्रस्य विशालग्रमवासिनः ।
विप्राग्र्यबोधपुत्रस्य योऽस्यां जातोऽन्यतो वचम् ॥७६.२५ ॥

गुरुरुवाच

कुतस्त्वं कथयानन्द ! चैत्रः को वा त्वयोच्यते ।
सङ्कटं महदाभाति क्व जातोऽत्र ब्रवीषि किम् ॥७६.२६ ॥

आनन्द उवाच

जातोऽहमवनीन्द्रस्य क्षत्रियस्य गृहे द्विज ।
तत्पत्न्यां गिरिभद्रायामाददे जातहारिणी ॥७६.२७ ॥

तयात्र मुक्तो हैमिन्या गृहीत्वा च सुतञ्च सा ।
बोधस्य द्विजमुख्यस्य गृहे नीतवती पुनः ॥७६.२८ ॥

भक्षयामास च सुतं तस्य बोधद्विजन्मनः ।
स तत्र द्विजसंस्कारैः संस्कृतो हैमिनीसुतः ॥७६.२९ ॥

वयमत्र महाभाग ! संस्कृता गुरुणा त्वया ।
मया तव वचः कार्यमुपैमि कतमां गुरो ॥७६.३० ॥

गुरुरुवाच

अतीव गहनं वत्स ! सङ्कटं महदागतम् ।
न वेद्मि किञ्चिन्मोहेन भ्रमन्तीव हि बुद्धयः ॥७६.३१॥

आनन्द उवाच

मोहस्यावसरः कोऽत्र जगत्येवं व्यवस्थिते ।
कः कस्य पुत्रो विप्रर्षे ! को वा कस्य नु बान्धवः ॥७६.३२॥

आरभ्य जन्मनो नृणां सम्बन्धित्वमुपैति यः ।
अन्ये सम्बन्धिनो विप्र ! मृत्युना सन्निवर्तिताः ॥७६.३३॥

अत्रापि जातस्य सतः सम्बन्धोयोऽस्य बान्धवैः ।
सोऽप्यस्तङ्गते देहे प्रयात्येषोऽखिलक्रमः ॥७६.३४॥

अतो ब्रवीमि संसारे वसतः को न बान्धवः ।
को वापि सततं बन्धुः किं वो विभ्राम्यते मतिः ॥७६.३५ ॥

पितृद्वयं मया प्राप्तमस्मिन्नेव हि जन्मनि ।
मातृद्वयञ्च किञ्चित्रं यदन्यद् देहसम्भवे ॥७६.३६ ॥

सोऽहं तपः करिष्यामि त्वया यो ह्यस्य भूपतेः ।
विशालग्रामतः पुत्रश्चैत्र आनीयतामिह ॥७६.३७ ॥

मार्कण्डेय उवाच

ततः स विस्मितो राजा सभार्यः सह बन्धुभिः ।
तस्मान्निवर्त्य ममतामनुमेने वनाय तम् ॥७६.३८ ॥

चैत्रमानीय तनयं राज्ययोग्यं चकार सः ।
संमान्य ब्राह्मणं येन पुत्रबुद्ध्या स पालितः ॥७६.३९ ॥

सोऽप्यानन्दस्तपस्तेपे बाल एव महावने ।
कर्मणां क्षुपणार्थाय विमुक्तेः परिपन्थिनाम् ॥७६.४०॥

तपस्यन्तं ततस्तञ्च प्राह देवः प्रजापतिः ।
किमर्थं तप्यसे वत्स ! तपस्तीव्रं वदस्व तत् ॥७६.४१॥

आनन्द उवाच

आत्मनः शुद्धिकामोऽहं करोमि भगवंस्तपः ।
बन्धाय मम कर्माणि यानि तत्क्षपणोन्मुखः ॥७६.४२॥

ब्रह्मोवाच

क्षीणाधिकारो भवति मुक्तियोग्यो न कर्मवान् ।

सत्त्वाधिकारवान् मुक्तिमवाप्स्यति ततो भवान् ॥७६.४३ ॥

भवता मनुना भाव्यं षष्ठेन व्रज तत् कुरु ।
अलन्ते तपसा तस्मिन् कृते मुक्तिमवाप्स्यसि ॥७६.४४ ॥

मार्कण्डेय उवाच

इत्युक्तो ब्रह्मणा सोऽपि तथेत्युक्त्वा महामतिः ।
तत्कर्माभिमुखो यातस्तपसो विरराम ह ॥७६.४५ ॥

चाक्षुषेत्याह तं ब्रह्मा तपसो विनिवर्तयन् ।
पूर्वनाम्ना बभूवाथ प्रख्यातश्चाक्षुषो मनुः ॥७६.४६ ॥

उपयेमे विदर्भां स सुतामुग्रस्य भूभृतः ।
तस्याञ्चोत्पादयामास पुत्रान् प्रख्यातविक्रमान् ॥७६.४७ ॥

तस्य मन्वन्तरेशस्य येऽन्तरे त्रिदशा द्विज ।
ये चर्षयस्तथैवेन्द्रो ये सुताश्चास्य तान् शृणु ॥७६.४८ ॥

आप्या नाम सुरास्तत्र तेषामेकोऽष्टको गणः ।
प्रख्यातकर्मणां विप्र ! यज्ञे हव्यभुजामयम् ॥७६.४९ ॥

प्रख्यातबलवीर्याणां प्रभामण्डलदुर्दृशाम् ।
द्वितीयश्च प्रसूताख्यो देवानामष्टको गणः ॥७६.५० ॥

तथैवाष्टक एवान्यो भव्याख्यो देवतागणः ।
चतुर्थश्च गणस्तत्र यूथगाख्यस्तथाष्टकः ॥७६.५१ ॥

लेखसंज्ञास्तथैवान्ये तत्र मन्वन्तरे द्विज ।
पञ्चमे च गणे देवास्तत्संज्ञा ह्यमृताशिनः ॥७६.५२ ॥

शतं क्रतूनामाहृत्य यस्तेषामधिपोऽभवत् ।
मनोजवस्तथैवेन्द्रः संख्यातो यज्ञभागभुक् ॥७६.५३ ॥

सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥७६.५४ ॥

ऊरु-पुरु-शतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥७६.५५ ॥

एतत्ते कथितं षष्ठं मया मन्वन्तरं द्विज ।
चाक्षुषस्य तथा जन्म चरितञ्च महात्मनः ॥७६.५६ ॥

साम्प्रतं वर्तते योऽयं नाम्ना वैवस्वतो मनुः ।
सप्तमीयेऽन्तरे तस्य देवाद्यास्तान् शृणुष्व मे ॥७६.५७ ॥

य इदं कीर्तयेद् धीमान् चाक्षुषस्यान्तरं भुवि ।
शृणुते च लभेत् पुत्रानारोग्यसुखसम्पदम् ॥७६.५८ ॥

इति श्रीमार्कण्डेयपुराणे षष्ठं मन्वन्तरं समाप्तम्,अध्याय: षट्सप्ततितम:

सप्तसप्ततितमोऽध्याय:- ७७

मार्कण्डेय उवाच

मार्तण्ड रस्यवेर्भार्या तनया विश्वकर्मण: ।

संज्ञा नाम महाभाग तस्यां भानुरजीजनत् ॥७७.१ ॥

मनुं प्रख्यातयशसमनेकज्ञानपारगम् ।

विवस्वत: सुतो यस्मात्तस्माद्वैवस्वतस्तु स: ॥७७.२ ॥

संज्ञा च रविणा दृष्टा निमीलयति लोचने ।

यतस्तत: सरोषोऽर्क: संज्ञां निष्ठुरमब्रवीत् ॥७७.३ ॥

मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमम् ।
तस्माज्जनिष्यसे मूढे प्रजासंयमनं यमम् ॥७७.४ ॥

मार्कण्डेय उवाच

ततः सा चपलां दृष्टिं देवी चक्रे भयाकुला ।
विलोलितदृशं दृष्ट्वा पुनराह च तां रविः ॥७७.५ ॥

यस्माद्विलोलिता दृष्टिर्मयि दृष्टे त्वयाधुना ।
तस्माद्विलोलां तनयां नदीं त्वं प्रसविष्यसि ॥७७.६ ॥

मार्कण्डेय उवाच

ततस्तस्यान्तु संजज्ञे भर्तृशापेन तेन वै ।

यमश्च यमुना चेयं प्रख्याता सुमहानदी ॥७७.७ ॥

सापि संज्ञा रवेस्तेजः सेहे दुः खेन भामिनी ।
असहन्ती च सा तेजश्चिन्तयामास वै तदा ॥७७.८ ॥

किङ्करोमि क्क गच्छामि क्क गतायाश्च निर्वृतिः ।
भवेन्मम कथं भर्ता कोपमर्कश्च नैष्यति ॥७७.९ ॥

इति संचिन्त्य बहुधा प्रजापतिसुता तदा ।
बहु मेने महाभागा पितृसंश्रयमेव सा ॥७७.१० ॥

ततः पितृगृहे गन्तुं कृतबुद्धिर्यशस्विनी ।
छायामयीमात्मतनुं निर्ममे दयितां रवेः ॥७७.११ ॥

ताञ्चोवाच त्वया वेश्मन्यत्र भानोर्यथा मया ।
तथा सम्यगपत्येषु वर्तितव्यं यथा रवौ ॥७७.१२ ॥

पृष्टयापि न वाच्यन्ते तथैतद्गमनं मम ।
सैवास्मि नाम संज्ञेति वाच्यमेतत्सदा वचः ॥७७.१३ ॥

छायसंज्ञोवाच

आकेशग्रहणाद् देवि ! आशापाच्च वचस्तव ।
करिष्ये कथयिष्यामि वृत्तन्तु शापकर्षणात् ॥७७.१४ ॥

इत्युक्ता सा तदा देवी जगाम भवनं पितुः ।
ददर्श तत्र त्वष्टारं तपसा धूतकल्मषम् ॥७७.१५ ॥

बहुमानाच्च तेनापि पूजिता विश्वकर्मणा ।
तस्थौ पितृगृहे सा तु कञ्चित्कालमनिन्दिता ॥७७.१६ ॥

ततस्तां प्राह चार्वङ्गी पिता नातिचिरोषिताम् ।
स्तुत्वा च तनयां प्रेमबहुमानपुरः सरम् ॥७७.१७ ॥

त्वान्तु मे पश्यतो वत्से दिनानि सुबहून्यपि ।
मुहूर्तार्धसमानि स्युः किन्तु धर्मो विलुप्यते ॥७७.१८ ॥

बान्धवेषु चिरं वासो नारीणां न यशस्करः ।
मनोरथो बान्धवानां नार्या भर्तृगृहे स्थितिः ॥७७.१९ ॥

सा त्वं त्रैलोक्यनाथेन भर्त्रा सूर्येण सङ्गता ।
पितृगेहे चिरं कालं वस्तुं नार्हसि पुत्रिके ॥७७.२० ॥

सा त्वं भर्तृगृहं गच्छ तुष्टोऽहं पूजितासि मे ।
पुनरागमनं कार्यं दर्शनाय शुभे मम ॥७७.२१ ॥

मार्कण्डेय उवाच

इत्युक्ता सा तदा पित्रा तथेत्युक्त्वा च सा मुने ।

संपूजयित्वा पितरं जगामाथोत्तरान् कुरून् ॥७७.२२ ॥

सूर्यतापमनिच्छन्ती तेजसस्तस्य बिभ्यती ।
तपश्चचार तत्रापि वडवारूपधारिणी ॥७७.२३ ॥

संज्ञेयमिति मन्वानो द्वितीयायामहस्पतिः ।
जनयामास तनयौ कन्याञ्चैकां मनोरमाम् ॥७७.२४ ॥

छायासंज्ञा त्वपत्येषु यथा स्वेष्वतिवत्सला ।
तथा न संज्ञाकन्यायां पुत्रयोश्चान्ववर्तत ॥७७.२५ ॥

लालनाद्युपभोगेषु विशेषमनुवासरम् ।
मनुस्तत् क्षान्तवानस्य यमस्तस्या न चक्षमे ॥७७.२६ ॥

ताडनाय च वै कोपात् पादस्तेन समुद्यतः ।
तस्याः पुनः क्षान्तिमता न तु देहे निपातितः ॥७७.२७ ॥

ततः शशाप तं कोपाच्छायासंज्ञा यमं द्विज ।
किञ्चित् प्रस्फुरमाणौष्ठी विचलत्पाणिपल्लवा ॥७७.२८ ॥

पितुः पत्नीममर्यादं यन्मां तर्जयसे पदा ।
भुवि तस्मादयं पदास्तवाद्यैव पतिष्यति ॥७७.२९ ॥

मार्कण्डेय उवाच

इत्याकर्ण्य यमः शापं मात्रा दत्तं भयातुरः ।
अभ्येत्य पितरं प्राह प्रणिपातपुरःसरम् ॥७७.३० ॥

यम उवाच

तातैतन्महदाश्चर्यं न दृष्टमिति केनचित् ।
माता वात्सल्यमुत्सृज्य शापं पुत्रे प्रयच्छति ॥७७.३१ ॥

यथा मनुर्ममाचष्टे नेयं मता तथा मम ।
विगुणेष्वपि पुत्रेषु न माता विगुणा भवेत् ॥७७.३२ ॥

मार्कण्डेय उवाच

यमस्यैतद्वचः श्रुत्वा भगवांस्तिमिरापहः ।
छायासंज्ञां समाहूय पप्रच्छ क्व गतेति सा ॥७७.३३ ॥

सा चाह तनया त्वष्टुरहं संज्ञा विभावसो ।
पत्नी तव त्वयापत्यान्येतानि जनितानि मे ॥७७.३४ ॥

इत्थं विवस्वतः सा तु बहुशः पृच्छतो यदा ।
नाचचक्षे ततः क्रुद्धो भास्वांस्तां शप्तुमुद्यतः ॥७७.३५ ॥

ततः सा कथयामास यथावृत्तं विवस्वतः ।

विदितार्थश्च भगवान् जगाम त्वष्टुरालयम् ॥७७.३६ ॥

ततः स पूजयामास तदा त्रैलोक्यपूजितम् ।
भास्वन्तं परया भक्त्या निजगेहमुपागतम् ॥७७.३७ ॥

संज्ञां पृष्टस्तदा तस्मै कथयामास विश्वकृत् ।
आगतैवेह मे वेश्म भवतः प्रेषितेति वै ॥७७.३८ ॥

दिवाकरः समाधिस्थो वडवारूपधारिणीम् ।
तपश्चरन्तीं ददृशे उत्तरेषु कुरुष्वथ ॥७७.३९ ॥

सौम्यमूर्तिः शुभाकारो मम भर्ता भवेदिति ।
अभिसन्धिञ्च तपसो बुबुधेऽस्या दिवाकरः ॥७७.४० ॥

शातनं तेजसो मेऽद्य क्रियतामिति भास्करः ।
तञ्चाह विश्वकर्माणं संज्ञायाः पितरं द्विज ॥७७.४१ ॥

संवत्सरभ्रमेस्तस्य विश्वकर्मा करवेस्ततः ।
तेजसः शातनञ्चक्रे स्तूयमानश्च दैवतैः ॥७७.४२ ॥

इति श्रीमार्कण्डेयपुराणे वैवस्वतमन्वन्तरे सप्तसप्ततितमोऽध्यायः

अष्टसप्ततितमोऽध्यायः- ७८

मार्कण्डेय उवाच

ततस्तं तुष्टुवुर्देवास्तथा देवर्षयो रविम् ।
वाग्भिरोड्यमशेषस्य त्रैलोक्यस्य समागताः ॥७८.१ ॥

देवा ऊचुः

नमस्ते ऋक्स्वरूपाय सामरूपाय ते नमः ।
यजुः स्वरूपरूपाय साम्नान्धामवते नमः ॥७८.२ ॥

ज्ञानैकधामभूताय निर्धूततमसे नमः ।
शुद्धज्योतिः स्वरूपाय विशुद्धायामलात्मने ॥७८.३ ॥

वरिष्ठाय वरेण्याय परस्मै परमात्मने ।
नमोऽखिलजगद्व्यापिस्वरूपायात्ममूर्तये ॥७८.४ ॥

इदं स्तोत्रवरं रम्यं श्रोतव्यं श्रद्धया नरैः ।
शिष्यो भूत्वा समाधिस्थो दत्त्वा देयं गुरोरपि ॥७८.५ ॥

न शून्यभूतैः श्रोतव्यमेतत्तु सफलं भवेत् ।
सर्वकारणभूताय निष्ठायै ज्ञानचेतसाम् ॥७८.६ ॥

नमः सूर्यस्वरूपाय प्रकाशात्मस्वरूपिणे ।

भास्कराय नमस्तुभ्यं तथा दिनकृते नमः ॥७८.७ ॥

शर्वरीहेतवे चैव सन्ध्याज्योत्स्नाकृते नमः ।
त्वं सर्वमेतद् भगवन् जगदुद्भ्रमता त्वया ॥७८.८ ॥

भ्रमत्याविद्धमखिलं ब्रह्माण्डं सचराचरम् ।
त्वदंशुभिरिदं स्पृष्टं सर्वं सञ्जायते शुचि ॥७८.९ ॥

क्रियते त्वत्करैः स्पर्शाज्जलादीनां पवित्रता ।
होमदानादिको धर्मो नोपकाराय जायते ॥७८.१० ॥

तावद्यावन्न संयोगि जगदेतत् त्वदंशुभिः ।
ऋचस्ते सकला ह्येता यजूंष्येतानि चान्यतः ॥७८.११ ॥

सकलानि च सामानि निपतन्ति त्वदङ्गतः ।
ऋङ्मयस्त्वं जगन्नाथ ! त्वमेव च यजुर्मयः ॥७८.१२ ॥

यतः साममयश्चैव ततो नाथ ! त्रयीमयः ।
त्वमेव ब्रह्मणो रूपं परञ्चापरमेव च ॥७८.१३ ॥

मूर्तामूर्तस्तथा सूक्ष्मः स्थूलरूपस्तथा स्थितः ।
निमेषकाष्ठादिमयः कालरूपः क्षयात्मकः ।
प्रसीद स्वेच्छया रूपं स्वतेजः शमनं कुरु ॥७८.१४ ॥

मार्कण्डेय उवाच

एवं संस्तूयमानस्तु देवैर्देवर्षिभिस्तथा ।
मुमोच स्वं तदा तेजस्तेजसां राशिरव्ययः ॥७८.१५ ॥

यत्तस्य ऋङ्मयं तेजो भविता तेन मेदिनी ।
यजुर्मयेनापि दिवं स्वर्गः साममयं रवेः ॥७८.१६ ॥

शातितास्तेजसो भागा ये त्वष्ट्रा दश पञ्च च ।

त्वष्ट्रैव तेन शर्वस्य कृतं शूलं महात्मना ॥७८.१७ ॥

चक्रं विष्णोर्वसूनाञ्च शङ्कवोऽथ सुदारुणाः ।
पावकस्य तथा शक्तिः शिबिका धनदस्य च ॥७८.१८ ॥

अन्येषामसुरारीणामस्त्राण्युग्राणि यानि वै ।
यक्षविद्याधराणाञ्च तानि चक्रे स विश्वकृत् ॥७८.१९ ॥

ततश्च षोडशं भागं बिभर्ति भगवान् विभुः ।
तत्तेजः पञ्चदशधा शातितं विश्वकर्मणा ॥७८.२० ॥

ततोऽश्वरूपधृग्भानुरुत्तरानगमत् कुरून् ।
तदृशे तत्र संज्ञाञ्च वडवारूपधारिणीम् ॥७८.२१ ॥

सा च दृष्ट्वा तमायान्तं परपुंसो विशङ्कया ।
जगाम संमुखं तस्य पृष्ठरक्षणतत्परा ॥७८.२२ ॥

ततश्च नासिकायोगं तयोस्तत्र समेतयोः ।
नासत्यदस्त्रौ तनयावश्वीवक्त्रविनिर्गतौ ॥७८.२३ ॥

रेतसोऽन्ते च रेवन्तः खड्गी चर्मी तनुत्रधृक् ।
अश्वारूढः समुद्भूतो बाणतूणसमन्वितः ॥७८.२४ ॥

ततः स्वरूपमतुलं दर्शयामास भानुमान् ।
तस्यैषा च समालोक्य स्वरूपं मुदमाददे ॥७८.२५ ॥

स्वरूपधारिणीञ्चैमामानिनाय निजाश्रयम् ।
संज्ञां भार्यां प्रीतिमतीं भास्करो वारितस्करः ॥७८.२६ ॥

ततः पूर्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयश्च यमः शापाद्धर्मदृष्टिरभूत् सुतः ॥७८.२७ ॥

कृमयो मांसमादाय पादतोऽस्य महीतले ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम् ॥७८.२८ ॥

धर्मदृष्टिर्यतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगं तं याम्ये चकार तिमिरापहः ॥७८.२९ ॥

यमुना च नदी जज्ञे कलिन्दान्तरवाहिनी ।
अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना ॥७८.३० ॥

गुह्यकाधिपतित्वे च रेवन्तोऽपि नियोजितः ।
च्छायासंज्ञासुतानाञ्च नियोगः श्रुयतां मम ॥७८.३१ ॥

पूर्वजस्य मनोस्तुल्यश्छायासंज्ञासुतोऽग्रजः ।
ततः सावर्णिकीं संज्ञामवाप तनयो रवेः ॥७८.३२ ॥

भविष्यति मनुः सोऽपि बलिरिन्द्रो यदा तदा ।
शनैश्चरो ग्रहाणाञ्च मध्ये पित्रा नियोजितः ॥७८.३३ ॥

तयोस्तृतीया या कन्या तपती नाम सा कुरुम् ।

नृपात् संवरणात् पुत्रमवाप मनुजेश्वरम् ॥७८.३४ ॥

तस्य वैवस्वतस्याहं मनोः सप्तममन्तरम् ।
कथयामि सुतान् भूपानृषीन् देवान् सुराधिपम् ॥७८.३५ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
वैवस्वतोत्पत्तिर्नामाष्टसप्ततितमोऽध्यायः

ऊनाशीतितमोऽध्यायः- ७९

मार्कण्डेय उवाच

आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः ।
भृगवोऽङ्गिरसश्चाष्टौ यत्र देवगणाः स्मृताः ॥७९.१ ॥

आदित्या वसवो रुद्रा विज्ञेयाः कश्यपात्मजाः ।
साध्याश्च मरुतो विश्वे धर्मपुत्रगणास्त्रयः ॥७९.२ ॥

भृगोस्तु भृगवो देवाः पुत्रा ह्यङ्गिरसः सुताः ।
एष सर्गश्च मारीचो विज्ञेयः साम्प्रताधिपः ॥७९.३ ॥

ऊर्जस्वी नाम चैवेन्द्रो महात्मा यज्ञभागभुक् ।
अतीतानागता ये च वर्तन्ते साम्प्रतञ्च ये ॥७९.४ ॥

सर्वे ते त्रिदशेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ।
सहस्राक्षाः कुलिशिनः सर्व एव पुरन्दराः ॥७९.५ ॥

मघवन्तो वृषाः सर्वे शृङ्गिणो गजगामिनः ।
ते शतक्रतवः सर्वे भूताभिभवतेजसः ॥७९.६ ॥

धर्माद्यैः कारणैः सुद्धैराधिपत्यगुणान्विताः ।

भूतभव्यभवन्नाथाः शृणु चैतत् त्रयं द्विज ॥७९.७ ॥

भूर्लोकोऽयं स्मृता भूमिरन्तरिक्षं दिवः स्मृतम् ।
दिव्याख्याश्च तथा स्वर्गस्त्रैलोक्यमिति गद्यते ॥७९.८ ॥

अत्रिश्चैव वसिष्ठश्च काश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजौ विश्वामित्रोऽथ कौशिकः ॥७९.९ ॥

तथैव पुत्रो भगवानृचीकस्य महात्मनः ।
जमदग्निस्तु सप्तैते मुनयोऽत्र नथान्तरे ॥७९.१० ॥

इक्ष्वाकुर्नाभगश्चैव धृष्टः शर्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभागारिष्ट एव च ॥७९.११ ॥

करूषश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्राः प्रकीर्तिताः ॥७९.१२ ॥

वैवस्वतमिदं ब्रह्मन् ! कथितन्ते मयान्तरम् ।

अस्मिन् श्रुते नरः सद्यः पठिते चैव सत्तम ।

मुच्यते पातकैः सर्वैः पुण्यञ्च महदश्नते ॥७९.१३ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे वैवस्वतकीर्तनं नामैकोनाशीतितमोऽध्यायः

अशीतितमोऽध्यायः- ८०

क्रौष्टुकिरुवाच

स्वायम्भुवाद्याः कथिताः सप्तैते मनवो मम ।

तदन्तरेषु ये देवा राजानो मुनयस्तथा ॥८०.१ ॥

अस्मिन् कल्पे सप्त येऽन्ये भविष्यन्ति महामुने ।
मनवस्तान् समाचक्ष्व ये च देवादयश्च ये ॥८०.२ ॥

मार्कण्डेय उवाच

कथितस्तव सावर्णिश्छायासंज्ञासुतश्च यः ।
पूर्वजस्य मनोस्तुल्यः स मनुर्भविताष्टमः ॥८०.३ ॥

रामो व्यासो गालवश्च दीप्तिमान् कृप एव च ।
ऋष्यशृङ्गस्तथा द्रोणस्तत्र सप्तर्षयोऽभवन् ॥८०.४ ॥

सुतपाश्चामिताभाश्च मुख्याश्चैव त्रिधा सुराः ।
विंशकः कथिताश्चैषां त्रयाणां त्रिगुणो गणः ॥८०.५ ॥

तपस्तप्तश्च शक्रश्च द्युतिर्ज्योतिः प्रभाकरः ।
प्रभासो दयितो धर्मस्तेजोरश्मिश्चिरक्रतुः ॥८०.६ ॥

इत्यादिकस्तु सुतपा देवानां विंशको गणः ।
प्रभुर्विभुर्विभासाद्यस्तथान्यो विंशको गणः ॥८०.७ ॥

सुराणाममिताभानां तृतीयमपि मे शृणु ।
दमो दान्तो ऋतः सोमो वित्ताद्याश्चैव विंशतिः ॥८०.८ ॥

मुख्या ह्येते समाख्याता देवा मन्वन्तराधिपाः ।
मारीचस्यैव ते पुत्राः कश्यपस्य प्रजापतेः ॥८०.९ ॥

भविष्याश्च भविष्यन्ति सावर्णस्यान्तरे मनोः ।
तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्मुने ॥८०.१० ॥

पाताल आस्ते योऽद्यापि दैत्यः समयबन्धनः ।
विरजाश्चार्ववीरश्च निर्मोहः सत्यवाक् कृतिः ।
विष्णवाद्याश्चैव तनयाः सावर्णस्य मनोर्नृपाः ॥८०.११ ॥

इति श्रीमार्कण्डेयपुराणेऽशीतितमोऽध्यायः

About this digital edition